श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीनारायणयतीन्द्र महादेशिकैः विरचितम्

# ॥ श्रीवीरराघवमङ्गलम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवीरराघवमङ्गलम् ॥

श्रीकिङ्गृह पुराधीशं स्वर्णवल्ली समन्वितम्।
शालिहोत्रमुनेर्वन्द्यं वीरराघवमाश्रये ॥ 1 ॥

मङ्गलं राघवेन्द्राय मधुकैटभहारिणे।
वीरराघव ! वैद्याय तुभ्यं भवतु मङ्गलम् ॥ 2 ॥

शालिहोत्रसदावन्द्य चरणद्वयशोभिने।
श्रितानामार्तिनाशाय रघुश्रेष्ठाय मङ्गलम् ॥ 3 ॥

विजयाख्य विमानेऽत्र विहारमुपजग्मुषे।
शार्ङ्गिणे शेषतल्पाय सुन्दरायास्तु मङ्गलम् ॥ 4 ॥

गम्भीर विपुलांसाय विशालोत्तुङ्गवक्षसे।
आजानुबाहवे तुभ्यं धीरोदात्ताय मङ्गलम् ॥ 5 ॥

शालिहोत्र शिरोन्यस्त दक्षिणश्रीकराय ते।
भक्तवत्सलरामाय चित्रलीलाय मङ्गलम् ॥ 6 ॥

नाभीनलिनसञ्जात वाणीहृदयहारिणः।
प्रणवार्थोपदेष्ट्रे ते स्वामिने मम मङ्गलम् ॥ 7 ॥

दिव्यचन्दन कर्पूर कुङ्कुमालङ्कृताय ते।
दिव्याप्सरोगणैर्नित्यं सेवितायास्तु मङ्गलम् ॥ 8 ॥

इन्दीवरदलश्यामसुकुमार सुवर्ष्मणे।
तुङ्गनासालसद्गण्ड भ्रूविलासाय मङ्गलम् ॥ 9 ॥

विलसच्चन्द्रिकातुल्य स्मितशोभिशुभानन।
वसुमत्यासमेताय तुभ्यं भवतु मङ्गलम्॥ **10** ॥

कन्दर्पकोटिलावण्य जगन्मोहनरूपिणे।
वेदवेदान्त वेद्याय सदा भवतु मङ्गलम्॥ **11** ॥

प्रातरुद्यत्सहस्रांशुसदृशा स्वेन तेजसा।
किङ्गेहमण्डनायास्तु महाराजाय मङ्गलम्॥ **12** ॥

नित्यैर्मुक्तैस्सदाभक्तैः सेव्यमानपदाब्ज ! ते।
वीक्षारण्य निवासश्रीद्विरेफायास्तु मङ्गलम्॥ **13** ॥

श्रीवैकुण्ठं परित्यज्य हृत्तापध्वंसिनीतटे।
श्रद्धया रममाणाय महाधीराय मङ्गलम्॥ **14** ॥

परकालमहीसार दिव्यसूरि नुताय ते।
पुंसां मोहनरूपाय किङ्गृहेशाय मङ्गलम्॥ **15** ॥

आदिवण्शठकोपादियतिवर्यस्तुताय ते।
वीरराघव वैद्याय नित्यश्रीर्नित्यमङ्गलम्॥ **16** ॥

इति नारायणाख्येन शठजिद्योगिना कृतम्।
मङ्गलं किङ्गृहेशस्य पठतामस्तु मङ्गलम्॥ **17** ॥

॥ इति श्रीवीरराघवमङ्गलं समाप्तम्॥